# 2022

## SANSKRIT — GENERAL

**Paper : DSE-A-2**

**(Indian Perspectives in Personality Development)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – B**

**(Marks : 30)**

1. अधोनिर्दिष्टेषु कस्य**चिदेकस्य** उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।

   (a) "दृष्ट्वेमान् स्वजनान् कृष्ण युयुत्सून्....."– अत्र वक्ता कः? वक्ता कान् स्वजनान् दृष्टवान्? तान् दृष्ट्वा वक्तुः कीदृशी अवस्था अभवत्? कथं वा तस्य तादृशी अवस्था अभवत्? 1+3+2+4

   (b) "प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि"– उक्तेरस्याः कः वक्ता? प्रकृतिपुरुषयोः स्वरूपकार्यादिकं स्वाधीतग्रन्थम् आश्रित्य विचार्यताम्। 1+9

   (c) "नैनं पश्यन्त्यचेतसः"– अत्र "एनं" पदेन किं लक्ष्यते? "अचेतसः" पदेन के लक्ष्यन्ते? अचेतसः किमर्थं एनं न पश्यन्ति? के पुनः एनं द्रष्टुं शक्नुवन्ति? 1+1+5+3

2. अधोलिखितेषु **पञ्च** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5

   (a) श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य नाम किम्?

   (b) श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अन्तर्भुक्ता? अत्र कति अध्यायाः सन्ति?

   (c) "हृषीकेश"–"गुडाकेश" पदद्वयेन कौ लक्ष्येते?

   (d) कृष्णस्य अर्जुनस्य च शङ्खयोः नाम किम्?

   (e) कथं वर्णसङ्करः जायते?

   (f) "तत्तेजो विद्धि मामकम्"– अत्र कीदृशं तेजः लक्ष्यते?

   (g) कः कथं पुरुषोत्तमरूपेण प्रथितः?

3. अधोलिखितेषु ***द्वयोः*** श्लोकयोः अनुवादः वङ्गभाषया आङ्गलभाषया वा कार्यः। 5×2

(a) सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत।
यावदेतान्निरीक्ष्येऽहं योद्धुकामानवस्थितान्।।

(b) उपद्रष्टानुमन्ता च भर्त्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः।।

(c) श्रोत्रं चक्षुः स्पर्शनञ्च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते।।

**Section – C**

**(Marks : 15)**

4. अधोलिखितेषु ***द्वयोः*** टीका कार्या। 4×2

रजोगुणः, तामसः यज्ञः, सात्त्विकं तपः, राजसिकं दानम्, सात्त्विकी श्रद्धा।

5. अधोलिखितेषु कस्य***चिदेकस्य*** प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या। 7×1

(a) तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन वध्नाति ज्ञानसङ्गेन चानघ।।

(b) अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः।।

(c) दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।।

**Section – D**

**(Marks : 20)**

6. अधस्तनेषु ***द्वयोः*** प्रश्नयोः उत्तरं प्रदेयम्।

(a) "हरन्ति प्रसभं मनः"– कानि मनः हरन्ति? उक्तेरस्याः किं तात्पर्यम्? 2+3

(b) "न मे भक्तः प्रणश्यति"– कस्य भक्तः कथं न प्रणश्यति? 1+4

(c) "स्वर्गे यान्ति परन्तपः"– के कदा स्वर्गे यान्ति? 2+3

(d) "क्षात्रं कर्म स्वभावजम्"– उत्केरस्याः तात्पर्यं विवृणुत। 5

(e) "तमेव शरणं गच्छ"– "तम्" पदेन को लक्ष्यते? तस्य शरणेन किं भवति? 2+3

7. निम्नलिखितेषु **द्वयोः** श्लोकयोः अनुवादः वङ्गभाषया आङ्गलभाषया वा कार्या। 5×2

(a) कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥

(b) येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः॥

(c) ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥

(d) पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥

———————